# 2019

## SANSKRIT — GENERAL

**Paper : CC/GE–2**

**Full Marks : 65**

*The figures in the margin indicate full marks.*
*Candidates are required to give their answers in their own words as far as practicable.*

### Section – A

1. अधोलिखितेषु **दश** प्रश्नाः संस्कृतभाषया देवनागरलिप्या च समाधेयाः। 2×10

   (क) बाणभट्टः कः आसीत्? तस्य पितुः नाम किम्?

   (ख) "अपरिणामोपशमो दारुणो लक्ष्मीमदः" केन प्रसङ्गेन कः एवम् उक्तवान्?

   (ग) तारापीडः कः आसीत्? तस्य पुत्रस्य नाम किम्?

   (घ) के धनपिशितग्रासगृध्राः? कथं ते एवम् उच्यन्ते?

   (ङ) कादम्बरी कीदृशं काव्यम्? तत्र नायिका-नायकौ कौ स्तः?

   (च) शुकनासः क आसीत्? तेन कः उपदिष्टः?

   (छ) 'महतोयं खल्वनर्थपरम्परा'— अत्र उल्लिखिता अनर्थपरम्परा का?

   (ज) 'अतिगहनं तमो यौवनप्रभवम्'— कः कं प्रति एवमुक्तवान्? कथं यौवनप्रभवं तमो अतिगहनम्?

   (झ) 'विरला हि तेषामुपदेष्टारः'— केषामुपदेष्टारः विरलाः कथं च?

   (ञ) यौवनकाले यूनां दृष्टिः कथम् अनुरागपूर्णा भवति?

   (ट) लक्ष्मीः कथम् अमृतसहोदरा इति कथ्यते?

   (ठ) धूर्ताः राजानं कथं प्रतारयन्ति?

2. अधोलिखितेषु कस्यचित् **एकस्य** उत्तरं प्रदेयम्। 10×1

   (क) शुकनासमनुसृत्य लक्ष्मीचञ्चलता वर्णनीया।

   (ख) 'बाणोच्छिष्टं जगत्सर्वम्'— सूक्तिरियं व्याख्यातव्या।

## Section – B

3. अधोलिखितेषु **पञ्च** प्रश्नाः संस्कृतभाषया देवनागरलिप्या च समाधेयाः। 2×5

(क) 'खेचरचक्रस्य' इत्यत्र विग्रहवाक्यं लिखित्वा समासनिर्णयः कार्यः।

(ख) 'मरीचिमाला' इत्यत्र विग्रहवाक्यं लिखित्वा समासनिर्णयः कार्यः।

(ग) 'विनतः' इत्यस्य प्रकृतिप्रत्ययनिर्णयः कर्तव्यः।

(घ) 'अवलोक्य' इत्यस्य प्रकृतिप्रत्ययनिर्णयः कार्यः।

(ङ) 'मन्दुरीक्रियन्ते' इत्यस्य व्याकरणानुसारिणी व्याख्या कार्या।

(च) 'समायाते' इत्यत्र सकारणविभक्तिनिर्णयः कर्तव्यः।

(छ) 'प्रबुद्धः' इत्यत्र प्रकृतिप्रत्ययनिर्णयः कार्यः।

4. अधस्तनेषु कस्यचित् **एकस्य** व्याख्या कार्या। 6×1

(क) एष भगवान् मणिराकाशमण्डलस्य, चक्रवर्ती खेचरचक्रस्य,
कुण्डलमाखण्डलदिशः, दीपको ब्रह्माण्डभाण्डस्य।

(ख) विलक्षणोऽयं भगवान् सकलकलाकलापकलनः सकलकालनः करालः कालः।

5. अधस्तनेषु **एकस्य** वङ्गानुवादः मातृभाषानुवादो वा कार्यः। 4×1

(क) कदलीदलकुञ्जायितस्य एतत्कुटीरस्य समन्तात् पुष्पवाटिका, पूर्वतः परमपवित्रपानीयं परसहस्रपुण्डरीकपटलपरिलसितं पतत्रिकुलकूजितपूजितं पयःपूरितं सर आसीत्। दक्षिणतश्चैको निर्झरझर्झरध्वनिध्वनितदिगन्तरः फलपटलाऽऽस्वादचपलितचञ्चुपतङ्गकुलाऽऽक्रमणाधिकविनतशाखशाखितसमूहव्याप्तः सुन्दर-कन्दरः पर्वतखण्ड आसीत्।

(ख) इदमाकर्ण्य किञ्चित् स्मित्वेव परितोऽवलोक्य च योगी जगाद– 'सत्यं न लक्षितो मया समयवेगः। यौधिष्टिरे समये कलितसमाधिरहं वैक्रमसमये उदस्थाम्। पुनश्च वैक्रमसमये समाधिमाकलय्य अस्मिन् दुराचारसमये समयेऽहमुत्थितोऽस्मि। अहं पुनर्गत्वा समाधिमेव कलयिष्यामि, किन्तु तावत् सङ्क्षिप्य कथ्यतां का दशा भारतवर्षस्येति'।

## Section – C

6. अधोलिखितेषु कस्यचित् **द्वयस्य** संस्कृतभाषया देवनागरलिप्या च टीका कार्या। 5×2

पञ्चतन्त्रम्, हितोपदेशः, वेतालपञ्चविंशतिका।

7. अधस्तनेषु कस्यचित् **एकस्य** टीका कार्या। 5×1

सिंहासनद्वात्रिंशिका, पुरुषपरीक्षा।